श्री शिव स्तुतिः (इंद्रादि कृतं)

श्री शिव स्तुतिः (इंद्रादि कृतं)

नमामि सर्वे शरणार्थिनो वयं
महेश्वर त्र्यंबक भूतभावन |
उमापते विश्वपते मरुत्पते
जगत्पते शंकर पाहि नस्स्वयं || 1 ||

जटाकलापाग्र शशांकदीधिति
प्रकाशिताशेषजगत्त्रयामल |
त्रिशूलपाणे पुरुषोत्तमाऽच्युत
प्रपाहिनो दैत्यभयादुपस्थितात् || 2 ||

त्वमादिदेवः पुरुषोत्तमो हरि-
र्भवो महेशस्त्रिपुरांतको विभुः |
भगाक्षहा दैत्यरिपुः पुरातनो
वृषध्वजः पाहि सुरोत्तमोत्तम || 3 ||

गिरीशजानाथ गिरिप्रियाप्रिय
प्रभो समस्तामरलोकपूजित |
गणेश भूतेश शिवाक्षयाव्यय
प्रपाहि नो दैत्यवरांतकाऽच्युत || 4 ||

पृथ्व्यादितत्त्वेषु भवान् प्रतिष्ठितो
ध्वनिस्वरूपो गगने विशेषतः |
लिनो द्विधा तेजसि स त्रिधाजले
चतुःक्षितौ पंचगुणप्रधानः || 5 ||

अग्निस्वरूपोसि तरौ तथोपले
सत्त्वस्वरूपोसि तथा तिलेष्वपि |
तैलस्वरूपो भगवान् महेश्वरः
प्रपाहि नो दैत्यगणार्दितान् हर || 6 ||

नासीद्यदाकांडमिदं त्रिलोचन
प्रभाकरेंद्रेंदु विनापि वा कुतः |
तदा भवानेव विरुद्धलोचन
प्रमादबाधादिविवर्जितः स्थितः || 7 ||

कपालमालिन् शशिखंडशेखर
श्मशानवासिन् सितभस्मगुंभित |
फणींद्रसंवीततनोंतकांतक
प्रपाहि नो दक्षधिया सुरेश्वर || 8 ||

भवान् पुमान् शक्तिरियं गिरेस्सुता
सर्वांगरूपा भगवन्-स्तदात्वयि |
त्रिशूलरूपेण जगद्भयंकरे
स्थितं त्रिनेत्रेषु मखाग्नयस्त्रयः || 9 ||

जटास्वरूपेण समस्तसागराः
कुलाचलास्सिंधुवहाश्च सर्वशः |
शरीरजं ज्ञानमिदं त्ववस्थितं
तदेव पश्यंति कुदृष्ट यो जनाः || 10 ||

नारायणस्त्वं जगतां समुद्भव-
स्तथा भवानेव चतुर्मुखो महान् |
सत्त्वादिभेदेन तथाग्निभेदितो
युगादिभेदेन च संस्थितस्त्रिधा || 11 ||

भवंतमेते सुरनायकाः प्रभो
भवार्थिनोऽन्यस्य वदंति तोषयन् |
यतस्ततोनो भव भूतिभूषण
प्रप्राहि विश्वेश्वर रुद्र ते नमः || 12 ||

इति श्री वराहपुराणे इंद्रादिकृत शिवस्तुतिः |